International Journal of Applied Research 2019; 5(1): 132-133



International Journal of Applied Research

**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2019; 5(1): 132-133
www.allresearchjournal.com
Received: 30-11-2018
Accepted: 31-12-2018

**डॉ० आशुतोश कुमार मिश्र**
लक्ष्मीपुर नवटोलिया, वासुदेवपुर बीड़ा, पी.टी.सी., दरभंगा बिहार, भारत

**Corresponding Author:**
**डॉ० आशुतोश कुमार मिश्र**
लक्ष्मीपुर नवटोलिया, वासुदेवपुर बीड़ा, पी.टी.सी., दरभंगा बिहार, भारत

# दूतकाव्यपरम्परायां उत्तरमेघदूतस्य रचनापरिपाकः

**डॉ० आशुतोष कुमार मिश्र**

**प्रस्तावना**

महाकविकालिदसस्य बहुविधाः रचनाः विद्यन्ते। तत्र महाकाव्यं, गीतिकाव्यं, नाटकमित्यादयश्च। तत्र मेघदूतस्यापि भागद्वयं विद्यते। प्रथम् पूर्वमेघदूतम् पुनश्च उत्तरमेघदूतमिति। अस्य दूतकाव्यस्य रचना महाकविकालिदासेन पुरानादि काव्ये वर्णित दूतकाव्यपरम्परायां कृतमिति मन्ये। तत्र उत्तरभागे यक्षोऽलकां वर्णयति परिचाययति च स्वगेहं स्वप्रेयस्याः परिचयनिमित्तकलक्षणान्यपि कथयति। ततह्न कथयति सन्देशम्। सन्देशे स प्रथमं स्वीयां विरहजनितावस्थां निर्वर्ण्यं तदनु स कथयति यत्मा नैवोद्विग्ना भवितुमर्हति। तत आरभ्य चतुर्मासानन्तरं तयोः संयोगोऽवश्यम्भावी। सोऽपि तन्ित्यैव कथमपि कृच्छ्रादेव दिनानि यापयन्नस्ति। सुखदुःखचक्रं तु सततं भ्रमणशीलमेवेति।
इदं विचिन्तयन्ति समालोचका यन्मेघदूतस्याधारेणावश्यमेव कवेः स्वकीयजीवनेन सह सम्बद्धेन भाव्यम्। तदनुसारेण नितान्तमसम्बद्धे विषये न कोऽपि तथा भावमग्नो भवति। प्रियतमाया वियोगेन यदा कश्चिद्भावमग्नो भवति तदैव तथा कश्चिदपि विचिन्तयितुं प्रभवति। वियोगस्य तथाविधकाष्ठा, भावानामुत्कटता प्रेम्णस्तन्मयता च यन्मेघदूते दृश्यते तेनावश्यमेवानुभूतेन भाव्यम्। इदमपि निश्चेतुं शक्यते यत्तदा कालिदास उ=यिनीतोः विप्रकृष्टदेशे वसन्नासीत्। प्रेम्ण इयमेवोपनिषद् यत्संयोगापेक्षया विप्रयोग एव तस्य प्राकर्ष्यं वर्धते। उक्तमेव धर्मकीर्तिना –

> 'सङ्गमविरहविकल्पे वरमिह विरहो न सङ्गमस्तस्याः।
> सङ्गे सैव तथैका त्रिभुवनमपि तन्मयं विरहे।।' [1]

यक्षोऽपि सर्वत्र प्रियामयमेव पश्यति। तस्य हि –

> 'त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया–
> मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम्।
> अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालप्यते मे
> क्रूरस्तस्मिन्न न सहते सङ्गमं नौ कृतान्तः।।' [2]

इति कथनेन को नाम सहृदयो न भावार्द्रहृदयो भवति। कथ्यते हि तदा कालिदासः केनाऽपि कार्येण उज्जयिनीतो दूरदेशे राज्ञा प्रेषितः समीवति, सम्भवति च कुन्तलेषु! तदा हि प्रावृषि प्रियाविरहेण तप्तहृदयः स उज्जयिनस्थितां स्वां प्रियां विचिन्त्य काव्यमिदं कृतवानित्यपि। केचिदस्य बीजं रामायणे विचिन्वन्ती। यथाऽऽह मल्लिनाथोऽपि––'सीतां प्रति रामस्य हनूमत्सन्देश मनसि निधाय मेघसन्देशं कविः कृतवानिति आहुः।' इति ब्रह्मवैवर्तपुराणे आषाढकृष्णस्य योगिन्येकादशीव्रतप्रसङ्गे कुबेरस्य यक्षं प्रति वर्षभोग्यस्य शापस्योल्लेखो दृश्यते, किन्तु कालिदासब्रह्मवैवर्तपुराणयोः पौर्वापर्यं सम्प्रत्यपि अनिर्णीतमेव। सम्भवति कविना मानवेतददूत्यकल्पना महाभारतस्य नलोपायख्याने हंसदूत्याद्गृहीतमपि भवेत्किन्तु काव्यस्वरूपं कवेर्नितान्तमेव मौकिलमविच्छिन्नञ्च। स कथयति स्वयमेव –

> 'मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः।
> कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे।।' [3]

तेन हि वयं तु मेघदूतय बीजमपि कालिदासे एव पश्यामः। स हि अन्योक्त्या स्वस्यैव भावातिरेकमुद्गिरति इत्यपि मन्यामहे वयम्। इदमपि सम्भवति यत्स काव्यप्रणयनकाले कुन्तलेष्वासीत्। यतो हि –

मामाकाशप्रणिहितभुजं निद्रयाश्लेषहेतो–
र्लब्धायास्ते कथमपि मया स्वप्नसन्दर्शनेषु।
पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेश्खाः पतन्ति।। [4]

इति कथनं कथं नाम परकीयं वा परोपदिष्टं सम्भवति। कवेरत्र या प्रकृत्या सह तादात्म्यानुभूतिर्वर्णिता साऽपि तथैव सङ्केतयति। स केन चेतसा कथितवानिदम् –

काले काले भवति भवतो यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम्। [5]

तस्य वर्णननैपुण्यं कन्नाम नाकर्षति। यथा हि –

त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञैः
प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमान्।। [6]

केचिदत्र मेघं कामं महाकालं तन्नियन्तारं यक्षमात्मानं तत्प्रेयसीं परमात्मानं कल्पयित्वा अक्षरब्रह्मसाक्षात्कार एव कवेरचाभिप्राय इत्यपि विचिन्तयन्ति। वयं तु तत्कोमलया मानवभावनया सह पण्डितैः कृतं महान्तमन्यायमेव मन्यामहे। सर्वत्र दर्शनस्य पृरुषं बीजं पश्यन्त एते पण्डिता नैव सहृदयकथनार्हाः। मेघदूतं हि केवलं मानवचेतसोः कमनीयो विलासो न तु दर्शनभारवाहोऽपि। अत्र तु कविः स्वमन्तर्भावं काव्ये प्रकटयति कामं कह्दित्र किमपि पश्यतु। काव्यस्यास्य सन्ति पञ्चाशदधिकाष्टीकाः। तासु मल्लिनाथस्य प्राचीनासु शेषराजरेग्मीमहोदयस्य नवीनासु प्रसिद्धा।

**संदर्भाः**


1. साहित्यदर्पणम्/दशमः परिच्छेदः ।
2. मेघदूतम् – 2ध्47 ।
3. तत्रैव–1/3।
4. संस्कृतसाहित्ये पृ0सं0– 117 ।
5. पूर्वमेघदूतम श्लोक सं0 11 ।
6. तत्रैव।